# Ribhuproktam Ahamevakevalatvanirupanam

# ઋભુપ્રોક્તં અહમેવકેવલત્વનિરૂપણમ્

## Document Information

Text title : Ribhuproktam Ahamevakevalatvanirupanam

File name : RRibhuproktaMahamevakevalatvanirUpaNam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | shaNkarAkhyaH ShaShThAMshaH | adhyAyaH 25| 10-26 ||

Latest update : August 5, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 5, 2023

*sanskritdocuments.org*

# ઋભુપ્રોક્તં અહમેવકેવલત્વનિરૂપણમ્

(અહમેવ હિ કેવલમ્)
સર્વાપરં ચ સદસત્કાર્યકારણકર્તૃકમ્ ।
સર્વં નાસ્ત્યેવ નાસ્ત્યેવ અહમેવ હિ કેવલમ્ ॥ ૨૫.૧૦॥

અશુદ્ધં શુદ્ધમદ્વૈતં દ્વૈતમેકમનેકકમ્ ।
સર્વં નાસ્ત્યેવ નાસ્ત્યેવ અહમેવ હિ કેવલમ્ ॥ ૨૫.૧૧॥

અસત્યસત્યમદ્વન્દ્વં (અસત્યં સત્યમદ્વૈતં) દ્વન્દ્વં ચ પરતઃ પરમ્ ।
સર્વં નાસ્ત્યેવ નાસ્ત્યેવ અહમેવ હિ કેવલમ્ ॥ ૨૫.૧૨॥

ભૂતં ભવિષ્યં વર્તં ચ મોહામોહૌ સમાસમૌ ।
સર્વં નાસ્ત્યેવ નાસ્ત્યેવ અહમેવ હિ કેવલમ્ ॥ ૨૫.૧૩॥

ક્ષણં લવં ત્રુટિર્બ્રહ્મત્વમ્પદં તત્પદં તથા ।
સર્વં નાસ્ત્યેવ નાસ્ત્યેવ અહમેવ હિ કેવલમ્ ॥ ૨૫.૧૪॥

ત્વમ્પદં તત્પદં વાપિ ઐક્યં ચ હ્યહમેવ હિ ।
સર્વં નાસ્ત્યેવ નાસ્ત્યેવ અહમેવ હિ કેવલમ્ ॥ ૨૫.૧૫॥

આનન્દં પરમાનન્દં સર્વાનન્દં નિજં મહત્ ।
સર્વં નાસ્ત્યેવ નાસ્ત્યેવ અહમેવ હિ કેવલમ્ ॥ ૨૫.૧૬॥

અહં બ્રહ્મ ઇદં બ્રહ્મ કં બ્રહ્મ હ્યક્ષરં પરમ્ ।
સર્વં નાસ્ત્યેવ નાસ્ત્યેવ અહમેવ હિ કેવલમ્ ॥ ૨૫.૧૭॥

વિષ્ણુરેવ પરં બ્રહ્મ શિવો બ્રહ્માહમેવ હિ ।
સર્વં નાસ્ત્યેવ નાસ્ત્યેવ અહમેવ હિ કેવલમ્ ॥ ૨૫.૧૮॥

શ્રોત્રં બ્રહ્મ પરં બ્રહ્મ શબ્દં બ્રહ્મ પદં શુભમ્ ।
સર્વં નાસ્ત્યેવ નાસ્ત્યેવ અહમેવ હિ કેવલમ્ ॥ ૨૫.૧૯॥

સ્પર્શો બ્રહ્મ પદં ત્વક્ચ ત્વક્ચ બ્રહ્મ પરસ્પરમ્ ।

(સ્પર્શો બ્રહ્મ પદં ત્વં ચ ત્વં ચ બ્રહ્મ ત્વક્ચ્યેતિ ।)
સર્વં નાસ્ત્યેવ નાસ્ત્યેવ અહમેવ હિ કેવલમ્ ॥ ૨૫.૨૦॥

પરં રૂપં ચક્ષુર્ભિરેવ તત્રૈવ યોજ્યતામ્ ।
સર્વં નાસ્ત્યેવ નાસ્ત્યેવ અહમેવ હિ કેવલમ્ ॥ ૨૫.૨૧॥

બ્રહ્મૈવ સર્વં સતતં સચ્ચિદાનન્દમાત્રકમ્ ।
સર્વં નાસ્ત્યેવ નાસ્ત્યેવ અહમેવ હિ કેવલમ્ ॥ ૨૫.૨૨॥

ચિન્મયાનન્દમાત્રોઽહં ઇદં વિશ્વમિદં સદા ।
સર્વં નાસ્ત્યેવ નાસ્ત્યેવ અહમેવ હિ કેવલમ્ ॥ ૨૫.૨૩॥

બ્રહ્મૈવ સર્વં યત્કિઞ્ચિત્તદ્બ્રહ્માહં ન સંશયઃ ।
સર્વં નાસ્ત્યેવ નાસ્ત્યેવ અહમેવ હિ કેવલમ્ ॥ ૨૫.૨૪॥

વાચા યત્પ્રોચ્યતે નામ મનસા મનુતે તુ યત્ ।
સર્વં નાસ્ત્યેવ નાસ્ત્યેવ અહમેવ હિ કેવલમ્ ॥ ૨૫.૨૫॥

કારણે કલ્પિતે યદ્યત્તૂષ્ણીં વા સ્થીયતે સદા ।
શરીરેણ તુ યદ્ભુઙ્ક્તે ઇન્દ્રિયૈર્યત્તુ ભાવ્યતે ।
સર્વં નાસ્ત્યેવ નાસ્ત્યેવ અહમેવ હિ કેવલમ્ ॥ ૨૫.૨૬॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋભુપ્રોક્તં અહમેવકેવલત્વનિરૂપણં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । શઙ્કરાખ્યઃ ષષ્ઠાંશઃ । અધ્યાયઃ ૨૫। ૧૦-૨૬ ॥

- .. shrIshivarahasyam . shankarAkhyaH ShaShThAMshaH . adhyAyaH 25. 10-26 ..

Notes :
Shiva Rahasyam Amsa-06 consists of the 50 Adhyaya-s that comprise the Ribhu Gita.
Selected verses from Ribhu Gita have been compiled here based on similarity of content.

Proofread by Ruma Dewan

*Ribhuproktam Ahamevakevalatvanirupanam*
pdf was typeset on August 5, 2023

Please send corrections to *sanskrit@cheerful.com*